Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SISRRJ | Volume 1 | Issue 2 | ISSN : 2581- 6306

# साहित्य शाब्दव्यञ्जनायाम् अभिधानियामकाः संयोगादयः

डॉ. सीता राम शर्मा
प्रोफेसर (साहित्य) राजकीय धुलेश्वर आचार्य,
(पी.जी. संस्कृत महाविद्यालय, मनोहरपुर, जयपुर)

**शोधसारांशः-** व्यङ्ग्यार्थस्य ज्ञानात् पूर्व, वाच्यार्थस्य ज्ञानबोधः अवश्यं भवेत् । अतः व्यङ्ग्यार्थज्ञानाय वाच्यार्थज्ञानं सहकारिकारणं भवति । प्रधानकारणं शब्द एव। इत्थं शब्दस्य व्यङ्ग्यार्थस्य च मध्ये स्थित्वा व्यङ्ग्यार्थस्य सहकारिकारणं सत् वाच्याथीऽपि व्यञ्जक एव इति भावः । “भद्रात्मनः” इत्यादिश्लोकस्थपदानि परिवर्त्य, तत्तत्पर्यायपदानि यदि उपयुञ्ज्महे तर्हि द्वितीयोऽर्थः व्यङ्ग्यार्थो न भवति । परिवर्तनं यदि अशक्यं भवति तर्हि परिवृत्त्यसहिष्णुत्वम् (परिवृत्त्यसहत्वम्) इति तस्य नाम । यदि श्लोके शब्दाः परिवृत्त्यसहिताः तर्हि तस्य ध्वनेः व्यङ्ग्यार्थस्य " शब्दमूलकध्वनिः" इति व्यवहारो भवति।

**मुख्यशब्दाः-** शब्दः, काव्यम्, वाचकः, लाक्षणिकः, व्यञ्जकः।

---

**उपोद्घातः** रमणीयार्थप्रतिपादकः शब्दः काव्यम् । अत्र काव्ये शब्दः - 1. वाचकः, 2. लाक्षणिकः, 3. व्यञ्जकः चेति त्रिधा' एवमर्थोऽपि त्रिधा 1. वाचकशब्देन बोध्यमानः अर्थः " वाच्यः", "वाच्यार्थः" अथवा "मुख्यार्थः " 2. लक्षकशब्देन बोध्यमानः अर्थः "लक्ष्यः " अथवा "लक्ष्यार्थः ", 3. व्यञ्जकशब्देन बोध्यमानः अर्थः " व्यङ्ग्यः " अथवा " व्यङ्ग्यार्थ : "2 इति विदितचरमेव समेषामा- लङ्कारिकविदुषाम् ।

**1. वाचकः** - अथ तत्र वाचकः इत्युक्ते - साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः । . इति काव्यप्रकाशे मम्मटाचार्यः स्पष्टीकृतवान्।

अर्थात् यः शब्दः साक्षात् सङ्केतितम् अर्थम् अभिधत्ते सः वाचकः इति । उदाहरणार्थ "नीरसतरुरिह विलसति गौः पुरतः । " इत्यत्र तरुशब्दः “वृक्षः " इत्यर्थस्य वाचकः भवति । नीरसशब्दः गुणवाचकः । गोशब्दस्तु जातिवाचकः । विलसति इति पदं तु क्रियावाचकं भवति । एवं च सङ्केतितार्थः चतुर्धा भवति यथा - 1. जातिवाचकः, 2. गुणवाचकः, 3. क्रियावाचकः, 4. नामवाचकः चेति । अथवा जातिरेक एव सङ्केतितार्थो भवति । सङ्केतः व्यक्तौ न भवति व्यक्तिसम्बन्धोपाधिषु युज्यते ।

**2. वाच्यार्थः अथवा मुख्यार्थः**

“स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिघोच्यते । "

स: साक्षात्सङ्केतित: वाच्यार्थ: एव मुख्यार्थ: इति मुख्यार्थं बोधयितुम् उपयुक्तस्य शब्दव्यापारस्य अभिधा इति च नाम । अयम् अभिधाव्यापार: इतरव्यापारापेक्षया मुख्य: भवति । अभिधार्थ–लक्ष्यार्थ– व्यङ्ग्यर्थैस्सह तात्पर्यार्थो वर्तते इति केचन अभिप्रयन्ति ।

**अभिधामूलाव्यञ्जनास्वरूपम्-** : आचार्यो मम्मट: लक्षणामूलां व्यञ्जनां निरूप्य, अभिधामूलां व्यञ्जनां प्रतिपादयति–

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।**

**संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्॥ ' इति ।**

मम्मटाचार्य: काव्यप्रकाशे लक्षणामूलव्यञ्जकत्वस्य कथनानन्तरमिमाम् अभिधामूलक – व्यञ्जनां कारिकारूपेण प्रकटितवान्।

अनेकार्थस्य = नाना अर्थयुक्तस्य

शब्दस्य = प्रातिपदिकस्य

वाचकत्वे = (अभिधाव्यापारेण) वाच्यार्थाभिज्ञापने

संयोगाद्यै: = संयोगादि चतुर्दशभि:

नियन्त्रिते = नियन्त्रिते सति

अवाच्यार्थधीकृत् = अवाच्यस्य अर्थस्य ज्ञानं प्रतिपादयितुं (व्यङ्ग्यार्थ द्योतयितुं )

व्यापृति: = ( आवश्यक: ) व्यापार:

अञ्जनम् = व्याञ्जना इति कारिकाया: प्रतिपदानामर्थ: ।

**अस्या: कारिकाया: अयं भाव:** - 11 कदाचित् एकस्य शब्दस्य एकार्थापेक्षया अनेके अर्था: भवेयु: । तर्हि तादृशे शब्दे एकस्मिन् वाक्ये प्रयुक्ते सति तस्य शब्दस्य सर्वे च अर्था: श्रोतु: कृते न उपस्थिता: भवन्ति। यतो हि वाक्यपदीये भर्तृहरिकथितरीत्या संयोगादय: तद्वाक्यस्थशब्दस्य सन्दर्भोचितमर्थं मात्रं बोधयितुम् उपकृता: भवन्ति । अत: वाक्यस्थस्य तादृशस्य शब्दस्य स: एक: अर्थ: एव वाच्यार्थ: भवितुमर्हति । तदर्थबोधनानन्तरम् अन्य: अर्थ: गोचरितो भवतु नाम । स च द्वितीयोऽर्थ: व्यञ्जनाव्यापारेणैव गोचरितो भवति । न तु अभिधा व्यापारेण । अभिधाव्यापार: प्रथमम् अर्थ बोधयितुं संयोगादिभि: नियमितत्वात्, तदर्थबोधनात् परम् उपरतो भवति । द्वितीयमर्थ बोधयितुं पुन: व्यापारान्तरम् आवश्यकं भवति । स च व्यापार: व्यञ्जनाव्यापार: इति । अत: इदं ज्ञायते यत् मुख्यार्थबोधनाय अभिधाव्यापार: एव प्रवर्तते – इति ।

शाब्दव्यञ्जनायाम् अभिधानियामका: संयोगादय: अथवा विशेषस्मृतिहेतव:–,

**" संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।**

**अर्थ: प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधि: ॥**

**सामर्थ्यमौचिती देश: कालो व्यक्ति: स्वरादय: ।**

**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव: ॥**

इति मम्मट : भर्तृहरिकारिके उद्धरति ।

एकस्मिन् वाक्ये, अनेकार्थबोधके शब्दे सति तस्य शब्दस्य क: अर्थ: ग्रहीतव्य: ? इत्यत्र अर्थविशेषं स्मारयितुं केचन हेतव: भवन्ति । ते यथा संयोग:, विप्रयोग:, साहचर्यम्, विरोध:, प्रयोजनम् (अर्थ), प्रकरणम्, लिङ्गम् अन्यस्य शब्दस्य सन्निधि:, सामर्थ्यम्, औचित्यम्, देश:, काल:, व्यक्ति:, स्वरादय: – इति । एते संयोगादय: अनेकार्थस्य शब्दस्य उचितार्थनिर्णयाय

नियामकाः भवन्ति । एतान् चतुर्थदश नियामकान् अनुसृत्य एव अर्थविशेषो स्मर्यते। तत्र आवश्यकः अर्थः ग्रहीतव्यो भवति मुख्येन अभिधाव्यापारेण ।

एतेषां क्रमेणोदाहरणानि यथा द्वयोः वस्त्वोः मध्ये उत द्वयोः व्यक्त्योः मध्ये अथवा वस्तु - व्यक्त्योः मध्ये लोकप्रसिद्धः सम्बन्धः संयोगः इत्युच्यते । अस्योदाहरणम् - " सशङ्खचक्रो हरिः " इति। शङ्खचक्राभ्यां सहितः हरिः इत्यर्थः । हरिशब्दस्य यमः, वायुः इन्द्रः, चन्द्रः, सूर्यः विष्णुः, सिंहः, किरणम्, अश्वः शुकः, सर्पः, वानरः, मण्डूकः इत्यादयः अनेके अर्थाः मुख्येन अभिधाव्यापारेण बोध्यन्ते । किन्तु शङ्खचक्रयोः संयोगः हरेः (विष्णोः) एव प्रसिद्धः। अतोऽयं संयोगः इति विशेषस्मृतिहेतुः हरिशब्दं विष्णुरूपार्थे एव अभिधाव्यापारेण नियमयति । तस्मात् अस्मिन् वाक्ये विष्णुरूपार्थः एव ग्रहीतव्यः । अयमेकः एव अस्य हरिशब्दस्य वाच्यार्थः भवति । अन्योदारणेष्वपि एवमेवावगन्तव्यम् । 1. का. प्र. 2.19 भर्तृहरेः उद्धते कारिके ।

2. **विप्रयोग**: - ऐक्यं प्रसिद्धे सति तयोः वियोगकथनं (योगे सति अयोगकथनम् ) विप्रयोगः इत्युच्यते । उदाहरणार्थम् - "अशङ्खचक्रो हरिः" इत्यत्र शङ्खचक्रयोः हरेश्च नित्यसंयोगः प्रसिद्धे सति हरेः शङ्खचक्रयोः वियोगः उक्तः । अतः अयं विप्रयोगः इति विशेषस्मृतिहेतुः विष्णुः इत्यस्मिन्नर्थे एव हरिशब्दं अभिधाव्यापारेण नियमयति ।

3. **साहचर्यम्** - मिलित्वा भ्रमणम् अथवा सह स्थिते : भावः साहचर्यं रामशब्दस्य दशरथरामः, परशुरामः, बलरामः इति त्रयोऽथीः सन्ति । किन्तु " रामलक्ष्मणौ " इति प्रयोगे लक्ष्मणसाहचार्यं दशरथरामाय एव वर्तते । अतः इदं नियामकसाहचर्यं रामलक्ष्मणौ इत्यत्र रामशब्दं दशरथरामे अभिधाव्यापारेण नियमयति ।

4. **विरोधिता** प्रसिद्धविरोधस्य भावः विरोधिता । रामः नाम कोऽपि रामः भवितुमर्हति । एवम् अर्जुनशब्दस्य कार्तवीर्यार्जुनो वा पाण्डवार्जुनो वा भवितुमर्हति । "रामार्जुन- गतिस्तयोः " (तयोः पद्धतिः रामार्जुनयोः पद्धतिरिव वर्तते । ) इत्यक्तौ परशुराम- कार्तवीर्यार्जुनयोः विरोधः प्रसिद्धत्वात् तस्मात् रामशब्दस्य परशुरामः इत्यस्मिन्नर्थे, 'अर्जनशब्दस्य कार्तवीर्यार्जुनार्थे च नियन्त्रयति इयं " विरोधिता " नामिका विशेषस्मृतिहेतुः ।

5. **अर्थः** 'अर्थो नाम प्रयोजनम्। उदाहरणार्थम् - " स्थाणुं भज भवच्छिदे (संसारबन्धच्छेदनार्थं स्थाणुं सेवय । ) इत्यत्र स्थाणुशब्दस्य नष्टशाखावृक्षमूलभागः, शिवः, प्रस्तरः इत्यर्थः सन्ति । किन्तु संसारबन्धच्छेदनम् इत्येतत् प्रयोजनं शिवः एव साधयति इत्यतः अत्र स्थाणुशब्दस्य शिवरूपार्थे नियमनम् अर्थः इत्याख्यनियामकहेतुना सम्भवति ।

6. **प्रकरणम्** - प्रकरणं नाम सन्दर्भः । उदा " सर्व जानाति देवः " (देवः एव सर्व जानाति ) इत्यत्र देव शब्दस्य देवता, राजा इत्येतादृशाः अर्थाः सन्ति। कश्चन राज्ञा सह संम्भाषणसन्दर्भे उक्तवाक्यस्थस्य अस्य देवशब्दस्य प्रभवः, तत्रभवन्तः इत्येतादृशः अर्थः ग्रहीतव्यः प्रकरणवशात् । अतः प्रकरणम् इति विशेषस्मृतिहेतुना अत्र अर्थनियमनं भवति ।

7. **लिङ्गम्** - एकस्मिन् वस्तुनि अथवा व्यक्तौ वा संयोगसम्बन्धात् भिन्नसम्बन्धेन संस्थितः, धर्मः लिङ्गम् इत्युच्यते । इदम् अन्यवस्तुभ्यः पृथक्करोति । अर्थात् व्यावर्तयति । उदा (मकरध्वजः कुपितवान् ) इत्यत्र मकरध्वजशब्दस्य

**" कुपितो मकरध्वजः मकरचिह्नः ध्वजः यस्य सः**

**" मन्मथः इति, मकराः एव ध्वजाः यस्मन् सः समुद्रः**

इति द्वौ अथौ स्तः । तदा कोप इति धर्मः मन्मथे एव संस्थितो भवति इत्यतः इदं कोपरूपं लिङ्ग इति विशेषस्मृतिहेतुः मकरध्वजशब्दं मन्मथार्थे नियन्त्रयति ।'

**8. अन्यशब्दसन्निधि:** एकस्य शब्दस्य पार्श्वे अन्यशब्दस्य संस्थानम् - अन्यशब्दसन्निधि: इत्युच्यते । "देवस्य पुरारातेः" ( पुरारातिश्चासौ देव: च) इत्यत्र देवशब्दस्य देव:, राजा इत्याद्यर्था: सन्त्यपि पुरारातिशब्दसन्निधानात् अस्य देवशब्दस्य शिव: इत्यर्थ: ग्रहीतव्यो भवति ।

**9. सामर्थ्यम् –** एकस्य कार्यस्य समुत्पादकशक्तेर्भाव: सामर्थ्यम् । उदा " मधुना मत्त: कोकिल:" (कोकिल: मधुना मत्त:) इत्यत्र मधुशब्दस्य मधु, वसन्तर्तु: इत्याद्यर्था: सन्ति । किन्तु कोकिलाय मादोत्पादकसामर्थ्य वसन्ततीरेव वर्तते इत्यत: मधुशब्दस्य वसन्तर्तु: इत्यर्थ: सामार्थ्यम् इति विशेषस्मृतिहेतुना स्वीकर्तव्यो भवति ।

**10. औचिती** औचिती नाम योग्यत्वम् । समुचितत्वम् इति च। तद्यथा"पातु वो दयितामुखम्" [युष्मान् दयिताया: मुखं पातु = रक्षतु ( सम्मुखो भवतु ) ] इत्यत्र मुखशब्दस्य प्रस्थानम्, मुखम्, प्रारम्भ:, उपाय: इत्याद्यर्था: सन्ति । अथाप्यत्र रक्षणम् इत्यस्य नायकाय आनन्दप्रदानं प्रारम्भ - उपायशब्दयो: न सिद्ध्यति । मुखविषये पालनम् अर्थात् रक्षणम् इत्यथी नोपपद्यते इत्यत: पातु इत्यस्य औचित्यात् सुमुखो भवतु इत्यर्थ:। अत: मुखशब्दस्य साम्मुख्यम् इत्यर्थ: औचिती इति विशेषस्मृतिहेतुना स्वीकर्तव्यो भवति ।

**11. देश:** देशो नाम प्राकृतिक: प्रदेश: इति । "भात्यत्र परमेश्वर:" इत्यस्मिन् उदाहरणे 'अत्र' इत्यस्य अस्मिन् राजधानीनगरे इत्यर्थ: । परमेश्वर:, भाति नाम विराजते इति । एवञ्चात्र परमेश्वरशब्दस्य शिव:, विष्णु: इत्याद्यर्था: बहवस्सन्ति । किन्त्वत्र राजधानीं निर्दिशन् - अत्र परमेश्वरो भाति इत्युक्तत्वात् राजधानीरूपदेशविशेषमहिम्ना परमेश्वरशब्दस्य राजा इत्यर्थ: वक्तव्य: । अत: अत्रशब्दस्य राजधानी इत्यर्थ: देश: इति विशेषस्मृतिहेतुना स्वीकर्तव्यो भवति ।

**12. काल:** उदा - "चित्रभानु: विभाति" (चित्रभानु: प्रकाशयति । ) इत्यत्र चित्रभानु- शब्दस्य सूर्य:, अग्नि: इति द्वौ अथौ स्त: । यदि " चित्रभानु: विभाति" इति वाक्यम् अहनि प्रयुक्तं तर्हि चित्रभानुशब्दस्य काल: इति अभिधानियामकेन "सूर्य: " इति, रात्रौ प्रयुक्तं चेत् " अग्नि:" इत्यर्थ: ग्रहीतव्यो भवति ।

**13. व्यक्ति:** व्यक्ति: नाम शब्दसम्बन्धपुंलिङ्ग - स्त्रीलिङ्ग-नपुंसकलिङ्गा: ग्रहीतव्या: । मित्रशब्द: नपुंसकलिङ्गे यदि भवति तर्हि सखा अथवा सखी इत्यर्थ: । यदि पुंलिङ्गे प्रयुक्त: तर्हि सूर्य: इत्यर्थ: । अत: " मित्रं भाति" इति नपुंसकलिङ्गप्रयोगस्य "सखा प्रकाशयति" इत्यर्थ, "मित्र: भाति" इति पुंलिङ्गप्रयोगस्य " सूर्य: प्रकाशयति " इत्यर्थं च व्यक्ति: इति विशेषस्मृतिहेतु: अभिधाव्यापारेण बोधयति ।

" एवञ्च "सशङ्खचक्रो हरि: ", " अशङ्खचक्रो हरि:" इत्यत्र हरिशब्दस्य अच्युते, "रामलक्ष्मणौ " इत्यत्र रामशब्दस्य दशरथपुत्रे रामे, "तयो: रामार्जुनगति: इत्यत्र रामार्जुनशब्दयो: परशुराम- कार्तवीर्यार्जुनयो:, "स्थाणुं भज भवच्छिदे " इत्यन्त्र स्थाणुशब्दस्य ईश्वरे, "सर्वं जानाति देव:" इत्यत्र राजनि भवति, "कुपित: मकरध्वज:" इत्यत्र मकरध्वजशब्दस्य मन्मथे, "देवस्य पुरारातेः" इत्यत्र पुरारातिशब्दस्य शिवे, "मधुना मत्त: कोकिल:" इत्यत्र मधुशब्दस्य वसन्ततौं, " पातु वो दयिता मुखम् " इत्यत्र मुखशब्दस्य साम्मुख्ये, " भात्यत्र परमेश्वर: " इत्यत्र परमेश्वरशब्दस्य राजनि, "चित्रभानुर्विभाति" इत्यत्र चित्रभानुशब्दस्य दिने रवौ, रात्रौ वह्नौ, "मित्रं भाति" इत्यत्र मित्रशब्दस्य सुहृदि, "मित्रो भाति" इत्यत्र मित्रशब्दस्य रवौ च संयोगादिभ्य: विशेषस्मृतिहेतुनियामकेभ्य: अभिधाव्यापार: अर्थ नियमयति ।

**'14. स्वर:** वेदे उदात्त: अनुदात्त: स्वरित: इति त्रय: स्वरा: सन्ति । एवं स्वरनियमं पालयन् वेदाध्ययनं करणीयम् । यदि स्वर: परिवर्तितो भवति तर्ह्यर्थोऽपि परिवर्तते ।

उदा – " इन्द्रशत्रुः" इतीदं पदं षष्ठीतत्पुरुषसमासतया एवं बहुव्रीहिसमासतयां' वा वक्तुं शक्यते। शत्रुः नाम संहारकः इत्यर्थः । बहुव्रीहिसमासे इन्द्रः शत्रुः यस्य सः इति विग्रहः। इन्द्रः यस्य संहारकः सः नाम इन्द्रेण हन्यमानः इत्यर्थः । बहुव्रीहिसमासे प्रथमपदम् उदात्तम्, एवं द्वितीयपदं च अनुदात्तं भवति ।

किन्तु षष्ठीतत्पुरुषसमासे " इन्द्रस्य शत्रुः" इति विग्रहवाक्यस्य इन्द्रस्य संहारक : इत्यर्थः । उद्दिष्टार्थः सम्पूर्णतया विनष्टः अर्थान्तरो नाम विपरीतार्थः आगतः । अत्र समासे द्वितीयपदम् उदात्तं भवति । इत्थं स्वरभेदमनुसृत्य अर्थपरिणामः वेदेऽस्ति काव्ये नास्ति । अतः वेदे एव विशेषार्थप्रतीतिः भवति ।

**15. अभिनयः**

**एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।**

**एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ॥**

उपर्युक्तभर्तृहरिकारिकायां "स्वरादयः" इत्यत्र आदिपदप्रयोगात् अभिनयः इत्यादीनि स्वीकरणीयानि । उदा – एका दूती नायकं प्रति नायिकायाः विरहावस्थाम् "एतावन्मात्रस्तनिका, एतावन्मात्राभ्याम् अक्षिपत्राभ्याम् सहिता एषा एतावन्मात्रदिवसेषु एतावन्मात्रावस्थां प्राप्ता" इति साभिनयं वर्णितवान् । एतावत् इति स्तनादीनां परिमाणं दर्शयती संवदति । अतः अत्र एतावत् शब्दस्य अर्थः अभिनयेन ज्ञायते । अतः अभिनयः अपि अभिधायाः अर्थनियामकेषु अन्यतमहेतुः भवति ।

**16. अपदेशः** आदिपदेन अपदेशोऽन्तर्भवति । वक्षस्थले हस्तं निक्षिप्य प्रदर्शनेन आत्मनः मनोगताभिप्रायसूचनम् अपदेशः इति । कुमारसम्भवस्य द्वितीयसर्गे इन्द्रादिदेवान् उद्दिश्य चुतुर्मुखब्रह्मा वदति । तद्यथा

**इतः स दैत्यः प्राप्तश्रीर्खेत एवार्हति क्षयम् ।**

**विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् । इति ।**

ब्रह्मणः उक्तवचनेषु – इतः इति पदोच्चारणं स्ववक्षस्थले हस्तं संस्थाप्य करोति इत्यतः इतः शब्दस्य मत्तः इत्यर्थ आगच्छति । मत्तः प्राप्तैश्वर्यं तं तारकासुरम् मयैव छदेनं नोचितं कर्म । स्वयं संवर्धितविषवृक्षस्य छेदनं यथा नोचितं तथा इदं कर्मापि न मया कर्तुं युज्यते । इत्यर्थः ।

इत्थं संयोगादिभिः अनेकार्थस्य शब्दस्य संस्थितान् अनेकार्थान् बोधने शक्तिं निवारितोऽपि एकस्मिन्नर्थे नियमने कृतेऽपि कुत्रचित् अर्थान्तरप्रतीतिः भवति । यतो हि अभिधाव्यापारः संयोगादिविशेषस्मृतिहेतूनां सहकारेण अनेकार्थस्य शब्दस्य एकमर्थ बोधयितुमेव नियमितोऽभवत् । एकमर्थं बोधयित्वा, विरमितोऽभूत् । पुनः अभिधाव्यापारस्य 'प्रवृत्तिः न भवति । तथैव लक्षणाव्यापारोऽपि न प्रवर्तते । यतो हि तेषु काव्यस्थलेषु मुख्यार्थबाधाद्यभावात्। अपि तु तत्र द्वितीयार्थबोधको व्यापारः अञ्जनमेव अर्थात् व्यञ्जनमेव – इति । तद्यथा

**भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।**

**। यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ॥ '**

अत्र राजवर्णनं प्रकृतकथा । प्रकृतस्य राजवर्णनस्य श्रवणात् परम्, अत्र प्रयुक्तशब्दाः नानार्थबोधका इति हेतोः राजरूपार्थेन सह गजरूपार्थोऽपि बुद्धिगोचरितो भवति ।

**1. राजवृत्तान्तपक्षे तावत्-** भद्रात्मनः शोभनरूपवतः अथवा तदन्तःकरणवतः, दुरधिरोहतनोः आक्रमयितुम् अशक्यदेहवतः, विशालवंशोन्नतेः महतः वंशोन्नतिमतः, कृतशिलीमुखसंग्रहस्य = समीकृतबाणाद्यायुधसम्पत्तिवतः (बाणप्रयोगनिपुणस्य),

अनुपप्लुतगते: = अमार्जितमर्यादवत:, परवारणस्य = शत्रुनिवारकस्य च यस्य = यस्य राज्ञ: कर: = हस्त:, सततम् = सदा, दानाम्बुसेकसुभग: = दानोदकेन सिञ्चितत्वात् सुन्दर:, अभूत् = अभवत् - इति,

**2. गजवृत्तान्तपक्षे च-** भद्रात्मन: = गजजातिषु अन्यतमजातिसम्बद्धस्य, दुरधिरोहतनो: = अधिरोदुम् अशक्यदेहस्य, विशालवंशोन्नते: = विशालपृष्ठास्थि - औन्नत्यस्य कृतशिलीमुखसंग्रहस्य कृतभ्रमराणां संग्रहणवत:, अनुपप्लुतगते: प्रशान्तगमनवत:, यस्य यस्य, परवारणस्य = गज श्रेष्ठस्य, कर: = शुण्डादण्ड:, सततम् सदा, नित्यम्, दानाम्बुसेकसुभग: = दानोदकेन सिञ्चितत्वात् सुन्दर:, अभूत् = अभवत् इति ।

अत्र श्लोके वाच्यार्थ: राजवृन्तान्त:। स: प्रकृतार्थ: राजवृत्तान्त: अनेकार्थानां भद्रात्मन: इत्यादिशब्दानाम् अभिधाव्यापार: राजरूपार्थं बोधयितुं नियन्त्रितोऽपि सहृदयानां मनसि 'तेषां प्रतिभासामर्थ्यवशात् द्वितीयोऽर्थोऽपि स्फुरति । द्वितीयार्थ: गजवृत्तान्त: व्याञ्जनाव्यापरेणैव गम्य: भवति । अत: गजवृत्तान्त: व्यङ्ग्यार्थ: भवति । अत्र श्लोके वाच्यस्य राज्ञ: व्यङ्ग्यस्य गजस्य च उपमानोपमेयभाव: (अयं 'राजा गजसदृश: । ) व्यञ्जनया गम्यते ।

सहृदयस्य द्वितीयार्थस्फूर्ति: भवतु इति धियैव कवि: काव्यं द्वयर्थयुक्तपदानि चित्वा निबद्धवान्। अथापि इदं कवे: तात्पर्यम् इति ग्रहीतुं यस्य कस्यापि प्रमाणस्याभावात् द्वितीयार्थस्फूर्ति: व्यञ्जनाव्यापारेणैव सिद्धयति इत्यङ्गीकर्तव्यमेव ।

किन्तु अत्र श्लोके द्वितीयाथीऽपि अभिधाव्यापारेणैव बोध्यते, राज- गजयो : उपमेयोपमानभाव: एव व्यञ्जनागम्य: इति पण्डितराज जगन्नाथ: सयुक्तिकं प्रत्यपादयत् ।. उपमानोपमेयभाव: व्यङ्ग्य: इति कथने तस्य नास्ति विप्रतिपत्ति: । अतिविस्तृतमेषा चची तत्रैवावलोकयितव्या जिज्ञासुभि: ।

अत: तद्युक्त: = व्यञ्जनाव्यापारेण युक्त: शब्द:= शब्द:, व्यञ्जक: व्यञ्जको भवति इति कथनं युक्तियुक्तम् ' ।

यत् = यस्मात् कारणात्, स: = स: शब्द:, अर्थान्तरयुक् = प्रकृत: आत्मन: शक्यार्थस्य व्यवधानेन युत:, तथा = व्यञ्जकरूपेण स्थित:, तस्मात् कारणात् तत्र = काव्ये, सहकारितया = सहकारिकारणतया स्थिततत्वात् अर्थोऽपि = अर्थ: अपि व्यञ्जक: = व्यञ्जक: इति, मत: अङ्गीकृत: ।।

एक: शब्द: प्रथमं स्वशक्यार्थ बोधयित्वा तत: परं व्यङ्ग्यार्थमपि बोधयति । अत: शब्दस्य व्यङ्ग्यार्थस्य च मध्ये वाच्याथी भवति । व्यङ्ग्यार्थस्य ज्ञानात् पूर्व, वाच्यार्थस्य ज्ञानबोध: अवश्यं भवेत् । अत: व्यङ्ग्यार्थज्ञानाय वाच्यार्थज्ञानं सहकारिकारणं भवति । प्रधानकारणं शब्द एव ।

इत्थं शब्दस्य व्यङ्ग्यार्थस्य च मध्ये स्थित्वा व्यङ्ग्यार्थस्य सहकारिकारणं सत् वाच्याथीऽपि व्यञ्जक एव इति भाव: । "भद्रात्मन:" इत्यादिश्ध्लोकस्थपदानि परिवर्त्य, तत्तत्पर्यीयपदानि यदि उपयुञ्ज्महे तर्हि द्वितीयोऽर्थ: व्यङ्ग्यार्थो न भवति । परिवर्तनं यदि अशाक्यं भवति तर्हि परिवृत्त्यसहिष्णुत्वम् (परिवृत्त्यसहत्वम्) इति तस्य नाम । यदि श्लोके शब्दा: परिवृत्त्यसहिता: तर्हि तस्य ध्वने: व्यङ्ग्यार्थस्य " शब्दमूलकध्वनि:" इति व्यवहारो भवति ।।2

अतिध्यध्यापक:, श्री वैंकटेशवैदिकविश्वविद्यालय:, तिरुपति:, आन्ध्रप्रदेश :

शाब्दव्यञ्जनायाम् अभिधानियामका: संयोगादय:

**संकेताक्षरसूची**

का.प्र. = काव्यप्रकाश: ।

का.प्र.बाला. = काव्यप्रकाशबालानन्दिनी - आन्ध्रव्याख्यानम् ।

**आधारग्रन्थसूची**

1. काव्यप्रकाश: - अलङ्कारसन्दर्भ:, मम्मटभट्टविरचित: झळकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यटीकया समन्वित:, बनहट्टीत्युपाह्वयेन दशरथात्मजेन नारायणेन संशोधित: । पुनर्मुद्रितसंस्करणम् 2008, ISBN- 978-81-7110-322-5, मूल्यम् - 500, परिमल 'पब्लिकेशन्स, शक्तिनगर, दिल्ली - 110093

2. काव्यप्रकाश: "बालानन्दिनी" व्याख्यानसहित:, आन्ध्रव्याख्याता म.म.
आचार्य पुल्लेल श्रीरामचन्द्रुडु, प्रकाशक: - संस्कृतभाषाप्रचारसमिति:, हैदराबाद् - 500001, तेलङ्गाणा । प्रथममुद्रणम् - 1995,

3. काव्यप्रकाश: - मम्मटभट्टविरचित: नागेश्वरीटीकासहित:, चौखम्बासंस्कृत- ग्रन्थमाला, वाराणसी।

**सन्दर्भग्रन्था**

1. स्याद्वाचको लाक्षणिक: शब्दोऽत्र व्यञ्जकस्त्रिधा । का.प्र. 2.6
2. वाच्यादय: तदर्था: स्यु: - का.प्र. 2.6
3. का. प्र. 2.7
4. का. प्र. 2.8
5. का. प्र. 2.19
6. संयोग:
7. तद्युक्तो व्यञ्जक: शब्द: । का.प्र.2.20
8. का. प्र. बाला. पृ. 98-107